කැලණිය විශ්වවිද්‍යාලය - ශ්‍රී ලංකාව

දුරස්ථ සහ අඛණ්ඩ අධ්‍යාපන කේන්ද්‍රය

ශාස්ත්‍රවේදී (සාමාන්‍ය) උපාධි තෙවන පරීක්ෂණය (බාහිර) - 2013
(නව නිර්දේශය)
2016 අගෝස්තු - ඔක්තෝබර්

මානව ශාස්ත්‍ර පීඨය

සංස්කෘත - **SANS - E 3015**

**සංස්කෘත කාව්‍ය විචාරය හා නාට්‍ය විචාරය, බෞද්ධ සංස්කෘත සාහිත්‍යය**
**පළමු ප්‍රශ්නයට සහ තවත් ප්‍රශ්න හතරකට (04) පිළිතුරු සපයන්න.**

ප්‍රශ්න සංඛ්‍යාව : 08 යි. කාලය : පැය 03 යි.

---

01. මෙහි දක්වා ඇති සංස්කෘත පාඨ අතරින් හතරක් (04) සිංහලයට පරිවර්තනය කරන්න.

i

तत्र पुनर्ध्वनेर्लक्षयितुमारब्धस्य भूमिकां रचयितुमिदमुच्यते –

अर्थः सहृदयश्लाघ्यः काव्यात्मा यो व्यवस्थितः।
वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ ॥

काव्यस्य हि ललितोचितसंनिवेशचारुणः शरीरस्येवात्मा साररूपतया स्थितः सहृदयश्लाघ्यो योऽर्थस्तस्य वाच्यः प्रतीयमानश्चेति द्वौ भेदौ।

तत्र वाच्यः प्रसिद्धो यः प्रकारैरुपमादिभिः।
बहुधा व्याकृतः सोऽन्यौ काव्यलक्ष्मविधायिभिः ॥

ततो नेह प्रतन्यते केवलमनूद्यते पुनर्यथोपयोगमिति। ध्वन्यालोक

ii

संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिः
तद्भवस्तत्समो देशीत्यनेकः प्राकृतक्रमः ।। १.३३ ।।
महाराष्ट्राश्रयां भाषां प्रकृष्टं प्राकृतं विदुः
सागरः सूक्तिरत्नानां सेतुबन्धादि यन्मयम् ।। १.३४ ।।
शौरसेनी च गौडी च लाटी चान्या च तादृशी
याति प्राकृतं इत्येवम् व्यवहारेषु संनिधिम् ।। १.३५ ।।
आभीरादिगिरः काव्येष्वपभ्रंश इति स्मृताः
शास्त्रेषु संस्कृतादन्यदपभ्रंशतयोदितम् ।। १.३६ ।।
संस्कृतं सर्गबन्धादि प्राकृतं स्कन्धकादि यत्
ओसरादिरपभ्रंशो नाटकादि तु मिश्रकम् ।। १.३७ ।। काव्यादर्श

iii

कस्य मातुः पितुर्वापि - हिताशंसेयमीदृशी ।
देवतानामृषीणां वा - ब्रह्मणां वा भविष्यति ॥
तेषामेव सत्त्वानां - स्वार्थेप्येष मनोरथः ।
नोत्पन्न पूर्वः स्वप्नेपि - परार्थे सम्भवः कुतः ॥
सत्त्वरत्न विशेषोयमपूर्वो जायते कथं ।
यत्परार्थाशयोन्येषां न स्वार्थेप्युपजायते ॥
जगदानन्द बीजस्य - जगद्दुःखौषधस्य च ।
चित्तरत्नस्य यत्पुण्यं - तत्कथं हि प्रमीयताम् ॥ बोधिचर्यावतारे

iv

एतमेतेषां रसानामुत्पत्तिवर्णदैवतान्यभिव्याख्यातानि ।
इदानीमनुभावविभावव्यभिचारिसंयुक्तानां लक्षणनिदर्शनान्यभिव्याख्यास्यामः ।
स्थायिभावांश्च रसत्वमुपनेष्यामः ।
तत्र शृङ्गारो नाम रतिस्थायिभावप्रभवः । उज्ज्वलवेषात्मकः ।
यत्किञ्चिल्लोके शुचि मेध्यमुज्ज्वलं दर्शनीयं वा तच्छृङ्गारेणोपमीयते ।
यस्तावदुज्ज्वलवेषः स शृङ्गारवानित्युच्यते ।
यथा च गोत्रकुलाचारोत्पन्नान्याप्तोपदेशसिद्धानि पुंसां नामानि भवन्ति तथैवेषां रसानां भावानां च नाट्याश्रितानां चार्थानामाचारोत्पन्नान्योप्तोपदेशसिद्धानि नामानि ।
एवमेष आचारसिद्धो हृद्योज्ज्वलवेषात्मकत्वाच्छृङ्गारो रसः ।
स च स्त्रीपुरुषहेतुक उत्तमयुवप्रकृतिः ।
तस्य द्वे अधिष्ठाने सम्भोगो विप्रलम्भश्च ।
तत्र सम्भोगस्तावत्
ऋतुमाल्यानुलेपनालङ्कारेष्टजनविषयवरभवनोपभोगोपवनगमनानुभवनश्रवणदर्शनक्रीडालीलादिभिर्विभावैरुत्पद्यते । नाट्यशास्त्रे

v

तत्र शारिपुत्र तथागतो यद्यथापि नाम स पुरुषो बाहुबलिकः स्थापयित्वा बाहुबलम्। उपायकौशल्येन तान् कुमारकांस्तस्माददीप्तादगारानिष्कासयेत्। निष्कासयित्वा च तेषां पश्चादुदाराणि महायानिनि दद्यात्। एवमेव शारिपुत्र तथागतोऽप्यर्हन्। सम्यक्यसंबुद्धस्तथागतज्ञानबलवैशारद्यसमन्वागतः। स्थापयित्वा तथागतज्ञानबलवैशारद्यम्। उपायकौशल्यज्ञानेनादीप्तजीर्णपटलशरणनिवेशनसदृशात् त्रैधातुकात् सत्वानां निष्कासनहेतोस्त्रीणि यानान्युपदर्शयति। यदुत श्रावकयान प्रत्येकबुद्धयान बोधिसत्त्वयानमिति। त्रिभिश्च यानैः सत्वाल्लोभयति। एवं चैषा वदति - मा भवन्तोऽस्मिन्नादीप्तागारसदृशे त्रैधातुकेऽभिरमध्वं हीनेषु रूपशब्दगन्धरसस्पर्शेषु। अत्र हि यूयं त्रैधातुकेऽभिरताः पञ्चकामगुणसहगतया तृष्णया दह्यथ तप्यथ परितप्यथ। निर्धावध्वमस्मात् त्रैधुकात्। त्रीणि यानान्यनुप्राप्स्यथ यदिदं श्रावकयानं प्रत्येकबुद्धयानं बोधिसत्त्वयानमिति ॥ सद्धर्मपुण्डरीकसूत्रे

vi

चिरस्य वत मां तात राजधर्माणि पृच्छसि।
हन्त तेऽहं प्रवक्ष्यामि एकाग्रमनसो श्रुणु ॥
द्विभिस्तु पादकैस्तात अत्र लोकः प्रतिष्ठतः।
अलब्धलाभो अर्थस्य लब्धस्य परिरक्षणं ॥
तस्मादर्थस्य लाभार्थं लब्धस्य परिरक्षणे।
दृढं कुर्यासि व्यायामं धर्मेण मनुजाधिप ॥
यो वै भूमिपतिर्देव अधर्मेणानुशासति।
राष्ट्रस्य दुब्बलं भोति च्छिद्रभूतं समन्ततः ॥
तो च भूमिपतिर्देव धर्मेण अनुशासति।
राष्ट्रस्य स्थावरं भवति ऋद्धं स्स्फीतं जनाकुलं ॥ महावस्तु .अवदाने

vii

अथ खलु पूर्वस्यां दिशि विमलायां लोकधातौ विमलप्रभासस्य तथागतस्य बुद्धक्षेत्राल्ललितव्यूहो नाम बोधिसत्त्वो महासत्त्वस्तया प्रभया संचोदितः सन् गणनासमतिक्रान्तैश्च बोधिसत्त्वैः परिवृतः पुरस्कृतो येन बोधिमण्डो येन च बोधिसत्त्वस्तेनोपसंक्रामत्। उपसंक्रम्य च तस्यां वेलायां बोधिसत्त्वस्य पूजाकर्मणे तथारूपमृद्ध्यभिसंस्कारमभिसमकरोद् येनर्द्ध्यभिसंस्कारेणाभिसंस्कृतेन दशसु दिक्ष्वाकाशधातुपर्यवसानानि सर्वबुद्धक्षेत्राण्येकं मण्डलमात्रमादर्शयति स्म शुद्धस्य नीलवैडूर्यस्य। पञ्चगत्युपपन्नानां सर्वसत्त्वानां पुरतो बोधिमण्डे निषण्णं बोधिसत्त्वमुपदर्शयति स्म। ते च सत्त्वाः परस्परमेकाङ्गुलिकाभिर्बोधिसत्त्वमुपदर्शयन्ति स्म-कोऽयमेवंरूपः सत्त्वो ललितः, कोऽयमेवंरूपः सत्त्वो विराजत इति। तेषां च सत्त्वानां पुरतो बोधिसत्त्वो बोधिसत्त्वान्निर्मिमीते स्म। तत्र ते बोधिसत्त्वविग्रहा इमा गाथा अभाषन्त—

यस्या किंचन रागदोषकलुषा सा वासना उद्धृता
यस्या कायप्रभाकृता दशदिशे सर्वे प्रभा निष्प्रभाः।
यस्या पुण्यसमाधिज्ञाननिचयः कल्पौघसंवर्धितः
सोऽयं शाक्यमुनिर्महामुनिवरः सर्वा दिशो भ्राजते॥१॥इति॥

02. කවියෙකු සතු විය යුතු ගුණාංග මොනවාදැයි කාව්‍යාදර්ශය ඇසුරෙන් විවරණය කරන්න.

03. රස සංකල්පයෙහි ක්‍රමාභිවෘද්ධිය පැහැදිලි කරන්න.

04. නාට්‍ය පාත්‍ර ප්‍රභේද නාට්‍යශාස්ත්‍රානුසාරයෙන් වර්ගීකරණය කරන්න.

05. පහත සඳහන් වෘත්ත අතරින් පහක ලක්ෂ්‍ය - ලක්ෂණ පැහැදිලි කරන්න.

| | | | |
|---|---|---|---|
| i. | වසන්ත තිලකා, | vi. | මන්දාක්‍රාන්ත |
| ii. | මාලිනී, | vii. | විද්‍යුන්මාලා, |
| iii. | දෝධක, | viii. | උපෙන්ද්‍රවජ්‍රා, |
| iv. | තෝටක, | ix. | රථෝද්ධතා, |
| v. | භුජංගප්‍රයාත | | |

06. ලලිත විස්තරයෙහි හමුවන්නේ දේවත්වයට නැඟූ බෝසත් චරිතාපදානයකි. තහවුරු කරන්න.

07. සද්ධර්මපුණ්ඩරීක සූත්‍රයෙහි සඳහන් උපාය කෞශල්‍යඥානය විස්තර කරන්න.

08. බෝධිසත්ත්ව පරමාදර්ශය යනු කුමක් දැයි බෝධිචර්යාවතාරය ඇසුරෙන් විමර්ශනය කරන්න.

---
**********************